INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY ADVANCED RESEARCH TRENDS
ISSN : 2349-7408
VOLUME III, ISSUE 1(2), MARCH 2016

# TYPES OF VĪṆA IN MUSICOLOGY

**शारिका.के**
गवेषका, साहित्यविभागः, एस् एस् यु एस् कालटी

प्राचीनकालादेव सङ्गीतस्य महत्तरं स्थानं भवति। शाङ्र्गदेव प्रणीत सङ्गीतरत्नाकरनुसारेण गानं वादनं नृत्यं च सङ्गीतमित्युच्यते। तत् यथा—

**गीतं वाद्यं तथा नृत्यं त्रयं सङ्गीतमुच्यते।**[1]

सङ्गीतं न केवलं कला अपि तु शास्त्रं भवति। शास्त्रस्य कार्यं भवति शास्त्र अध्येयविषयान् वैज्ञानिक व्यवस्थान् प्रददाति येन विषयाणाम् अध्ययनं विधिपूर्वकं संम्पद्यते कलागतिः सर्वदा प्रवाहमाना भवति।
संस्कृतभाषयां सङ्गीत इति शब्दस्य व्युत्पत्तिः भवति सम् + गीत अर्थात् सम्यक्तया गायनम् गीतम्। अयमेव अर्थः वराहोपनिषदि एवं दृश्यते –

**सङ्गीततालवयवाद्यवशं गतापि मौलिस्थकुम्भपरिरक्षणाधीर्नटीव।**[2]

भरतायः आचार्याः धर्मार्थकाममोक्षाणां प्राप्त्यर्थं सर्वोत्तमः उपायः सङ्गीतम् इति स्वीकुर्वन्ति। सङ्गीतरत्नाकरे एवं उक्तम्—

**गीतेन प्रीयते देवः सर्वज्ञः पार्वतीपतिः।**
**गोपिपतिरनन्तोऽपि वंशध्वनिवंश गतः।।**
**सामगीतिरतो ब्रह्मा वीणासक्ता सरस्वती।**
**किमन्ये यक्षगन्धर्वदेवदानवमानवाः।।**
**अज्ञातविषयास्वादो बालः पर्यङ्किकागता।**
**रुदत्गतामृतं पीत्वा हर्षौत्कर्ष प्रपद्यते।।**
**वनेचरस्तृणाहारश्चित्रं मृगशिशुः पशुः।**
**लुब्धो लुब्धकसङ्गीते गीते यच्छति जीवितम्।।**
**तस्य गीतस्य माहात्म्यं के प्रशंसितुमीशते।**
**धर्मर्थकाममोक्षाणामिदमेवैकसाधनम्।।**[3]

**वाद्याः -**

अतोद्यम्, तच्चतुर्विधं यथा—

**ततं वीणादिकं वाद्यमान मुरजादिकम्।**
**वंश्यादिकन्तु सुषिरं कांस्यतालादिकं घनम्।।**[4]

**चतुर्विधसङ्गीतात्मकवाद्यम् -**

वाद्येभ्यः उत्पन्नाः सङ्गीतात्मकध्वनयः पञ्चसु रूपेषु प्रस्फुटिताः भवन्ति। ते च नगजः,वायुजः, चर्मजः, लोहजः तथा शरीरजः च। तत्र वीणादयः नगजाः, वशांदयः वायुजाः, मृदङ्गदय चर्मजाः, मञ्जीरादयः लोहजाः, कण्ठध्वनयश्च शरीरजाः भवन्ति। ते च प्रकाराः-

- **तन्त्रवाद्यम्**
- **अवनद्धवाद्यम् /आनद्धवाद्यम्**
- **घनवाद्यम्**
- **सुषिरवाद्यम्**

**तन्त्रवाद्यम्-**

तन्त्रवाद्यसैव तन्त्रीवाद्यम् इत्यपि नामान्तरं भवति। अस्मिन् वर्गे वाद्ययन्त्राणां तन्त्रीभ्यः सङ्गीतस्वराः जायन्ते। भारते तन्त्रवाद्यस्य परम्परा प्राचीना गण्यते। यथा वैदिकपरम्परायां तन्त्रवाद्यस्य प्रमुखं स्थानं अस्ति। वीणायाः परामर्शः तत्र अस्ति। यतः वैदीकवाङ्मये वीणा शब्दस्य प्रयोगः दृश्यते। ऋग्वेदे हिरण्यकेशीतसूक्ते तन्त्रवाद्यानां नामानि उपलभ्यन्ते। पाणिनीयशिक्षायां अलाबु वीणायाः उल्लेखः दृश्यते।

**वीणावादनतत्वज्ञः श्रुतिजातिविशारदः।**
**तालज्ञश्चाप्रयासेन मोक्षमार्गं च गच्छति।।**[5]

**वीणाप्रकार -**

**1.एकतन्त्रीवीणा**

अस्यां एकैव तन्त्री भवति। यतः नामेदं सार्थकं भवति। घोषा घोषिकः घोषवती इति नामान्तराणि अपि अस्याः वर्तन्ते। सर्वास्वपि वीणासु एकतन्त्रीवीणा अति मुख्या भवति। यतः सा सर्वासां वीणानां जन्मदात्री इति ज्ञायते।

भरताचार्याणां गुरुणा ब्रह्मण वीणा इयं उपयुक्ता। इत्यतः ब्रह्मवीणा इत्यपि नामान्तरं श्रुयते। अस्यां दक्षिण हस्तस्य मध्यमाङ्गुलि श्लाकामत्वं विभिन्नाः स्वराः उद्भाव्यन्ते। अथैव उक्तं—

**शलाकां वेणुनिर्वृत्तां द्वादशाङ्गुल्याधिकाम्।**
**वामहस्तकनिष्ठायां पृष्ठं विन्यस्य तत्परम्।।**
**संवेष्ट्यानामिकाङ्गुल्या तर्जन्यङ्गुलष्ठकस्ततः।**
**संपीड्य गाढमनया वादयेदखिलान् स्वरान्।।**[6]

## 2.कच्छपी वीणा

इयं भरताचार्येण निर्दिष्टा प्राचीना वीणा या आधुनिककाले न दृश्यते। केचन इमां एकतन्त्र्या समानं मन्यन्ते। भरताचार्येण तन्त्रवाद्यानां अङ्गप्रत्यङ्गविवेचन-समये कच्छपीवीणा प्रत्यङ्गीत्वेन निरूपिता। सुधाकलशः तथा विद्याविलासी इत्येतयोः पण्डितवर्योः वीणा इयं सरस्वतीवीणा इति मन्यते तदेव उक्तं—

**"सरस्वत्यास्तु कच्छपि"** [7]

वीणायाः अस्याः आकारः कच्छपसमानं भवति। इत्यतः नाम इदं सार्थकं जातम्।

## 3.कुब्जिकावीणा

नारदकृत सङ्गीतमकरन्दे वीणायाः अस्याः उल्लेखः दृश्यते। रघुनाथरचित-सङ्गीतसुधायां तथा यतिमानपातकण्ठेनापि वीणायाः अस्याः सामानोल्लेखः दृश्यते विशेषवर्णनं न उपलभ्यते। विद्याविलासीपण्डितेन वीणा इयं सामान्य वीणाभिः परिगणिताः लभते।

## 4.चित्रावीणा

अस्याः सप्ततन्त्रीवीणा इत्यपि नामान्तरं वर्तते। भरताचार्यानुसारं अस्यां सप्ततन्त्रयः भवन्ति। याश्च अङ्गुलीभिः वाद्यते। तदेव उक्तं भरतेन—

**"सप्ततन्त्री भवेच्चित्रा"** [8]

नान्यदेवानुसारं वीणायाः अस्याः वादकः मतङ्गः भवति। तदेव उक्तं –

**"मतङ्गो वादकस्तस्यश्चैत्रिके नाम नापरः"।** [9]

## 5.वहन्तीवीणा

नारदप्रणीतसङ्गीतमकरन्दे अस्याः नामोल्लेखः दृश्यते। अन्यत् विशिष्टं वर्णनं न उपलभ्यते।

## 6.परीवादिनीवीणा

कालिदासेन प्रथमतया वीणायाः अस्याः उल्लेखः कृतः। नारदेन सङ्गीतमकरन्दे अस्याः परिगणनां कृता। तत्र प्रतिपादितम् अस्याः अपि सप्ततन्त्रयः भवन्ति इति तदेव उक्तं –"सप्तभिः तन्त्रिभिः (वीणा) दृश्यते परिवादिनी"। सप्ततन्त्री वीणायाः इयं वर्णयुक्ता भवति।

## 7.जया तथा जेष्ठावीणा

अनयोः उपरि अपि विशेष वर्णनं कुत्रापि न लभ्यते स्वरूपनिरूपणमपि न दृश्यते परं वीणयोः अनयोः उल्लेखः सङ्गीतमकरन्दे दृश्यते।

## 8.घोषवती घोषीकावीणाः

प्रत्यङ्गवाद्यानां निरूपणावसरे भरतेन घोषवती वीणायाः उल्लेखः कृतः परन्तु अस्याः स्वरूपविषये उल्लेखः न दृश्यते। तत्र तथापि उत्तरोत्तराचार्याणां मतानुसारेण इयंमेव घोषघोषिका ब्राह्मी इत्यादिभिः नामाभिः प्रतिपादिता। इयंमेव एकतन्त्रीवीणा इति केषाञ्चन अभिप्रायः परं तत्र ऐकमत्यं नास्ति। यतः नारदेन घोषवत्याः तथा घोषिकाया नामनि पृथक्तया प्रतिपादितानि। सुधाकलशेनापि एतदेव प्रतिपादितं तेन घोषवत्याः तथा ब्राह्मीवीणायाः गणना पृथक् पृथक् कृता। सोमेश्वरेण मानसोल्लासे घोषवत्याः नामोल्लेखनं न कृतं परं एकतन्त्र्याः उल्लेखः कृतः। शाङ्र्गदेवेन स्पष्टतया इदं प्रतिपादितं एकतन्त्री वीणा एव घोषका वीणा इति तदेव—“एषोऽपि जनकः प्रोक्ता घोषकश्चैकतन्त्रिका” एवं बहुमतभेदाः सन्ति।

## 9.नकुलीवीणा

सङ्गीतरत्नाकरादिषु केषुचित् प्राचीनग्रन्थेषु अस्याः नामोल्लेखः दृश्यते। नकुलवीणा इत्यऽपि नामान्तरं वर्तते। तदेव—‘तन्त्रीद्वयेन नकुलः।’ गणानां च प्रभावती।’

सङ्गीतपारीजाते एतस्याः उल्लेखः दृश्यते। अस्याः वीणायाः प्रसारः तृतीयशताब्दितः आरभ्य त्रयोदशशताब्दिपर्यन्तं जातः। ततः परं लुप्ता जाता इयं वीणा।

## 10.महतीवीणा

प्राचीनसु वीणासु महती वीणायाः स्थानं अत्यन्तं महत्वपूर्णं भवति। सुधाकलश, नान्यदेवादि आचार्यानुसारं इयं देवर्षेः नारदस्य वीणा च समाना भवति। तदेव उक्तं—‘ महति नारदस्य च।’ नान्यदेवेन अस्याः स्वरूपपरिचयः कृतः । तदनुसारं अस्याः एकविंशति तन्त्रयः भवन्ति। शाङ्र्गदेवादयः आचार्याः मत्तकोकिल इति नामान्तरं दत्तवन्तः।

## 11.वैष्णवीवीणा

नारदप्रणीतसङ्गीतमकरन्दे अस्याः नामनिर्देशः एव दृश्यते। वस्तुतः इयं विष्णोः वीणा इति उच्यते। अन्यशास्त्रीयग्रन्थेषु अस्याः वीवरणं नोपभलभ्यते।

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY ADVANCED RESEARCH TRENDS
ISSN : 2349-7408
VOLUME III, ISSUE 1(2), MARCH 2016

## 12.ब्रह्मवीणा अथवा ब्रह्मी वीणा -

इयं एकतन्त्रीवीणा घोषवती वीणा इत्यभिधीयते। केषुचित् ग्रन्थेषु अनयोः नाम निर्देशः पृथक् अस्ति। केषुचित् एकत्वेन निरूपितम् अस्ति। सङ्गीतोपनिषत्सरोद्धारो नाम ग्रन्थे एवं वर्णितमस्ति—

**तथा घोषवती वीणा विपञ्ची काण्ठकूजिका।**
**वल्लकी ब्राह्मवीणोति वीणाभेदास्त्वनेकशः।।**[10]

## 13.रुद्रवीणा / रौद्रवीणा

रुद्रवीणायां एकसप्तके द्वादशस्वरस्थानानि भवन्ति। येन माध्यमेन भारतीय विद्वांसः एकादशरुद्रवीणानां तथा एकमहारुद्रस्य च दर्शनं प्राप्तवन्तः अत एव इयं रुद्रवीणा इति कथ्यते। रुद्रवीणा किन्नरी वीणायाः परिष्कृतरूपमेव इति केषांचन अभिप्रायः।रुद्रवीणायाः बहुषु प्रकारेषु द्वौ प्रकारौ मुख्यौ भवतः सरस्वतीवीणा, तञ्जौरीवीणा च।

## 14.कूर्मोवीणा

अस्याः अपि नामनिर्देश एव लभ्यते सङ्गीतमकरन्दे, सङ्गीतसुधायाम्, वाद्यप्रकाशे च।

## 15.रावणी (रावणहस्तवीणा)

अस्याः रावणास्त्रं इत्यपि नामान्तरं भवति। लङ्कायाम् एतादृशी वाद्यं अतिप्राचीनकालात् आरभ्यः प्रचलितासीत् इति श्रूयते। भारतीयैः वीणा इयं लङ्कातः उपलब्धः इत्यतः अस्याः एव हस्तवीणा रावणीवीणा इति च नामानि दत्ते।

## 16.सारस्वती वीणा

सङ्गीतमकरन्दे केवलं अस्याः नामनिर्देश एव श्रूयते अन्यत्र विचारः नास्ति।

## 17.किन्नरीवीणा

सारिकायुक्तवीणासु इयं किन्नरी वीणा महत्वपूर्ण भवति। अस्याः वर्णानं सङ्गीतरत्नाकरे उपलभ्यते तदनुसारं अस्याः द्वौ भेदौ भवतः। लघ्वीकिन्नरी, बृहतीकिन्नरी च, लघ्वीकिन्नर्याः तन्त्र्यः लोहनिर्मिताः भवन्ति। बृहतीकिन्नर्या स्नायुनिर्मिताः तन्त्र्यः भवन्ति।

## 18.सैरन्ध्रीवीणा

सङ्गीतमकरन्दकारः नारदः अस्याः वीणायाः नामोल्लेखः करोति। अस्याः विशिष्टविवरणं नास्ति।

## 19.द्वितन्त्रीवीणा

द्वितन्त्रीयुक्ता वीणा द्वितन्त्रीवीणा इति उच्यते। नकुलोवीणा इति अस्याः अपरनाम।

## 20.त्रितन्त्रीवीणा

त्रिभिस्तन्त्रिभिर्युक्ता वीणा त्रितन्त्रीवीणा इति उच्यते। अस्मिन् सन्दर्भे शाङ्र्गदेवः सङ्गीतरत्नाकरे वदति –'स्यादन्वर्था त्रितन्त्रिका।' अस्यामेव टीकायां सिंहभूपालः लिखति - 'त्रितन्त्रिका,'अन्वर्था त्रिभिस्तन्त्रीभिर्युक्ता त्रितन्त्रिका।'

## 21.सप्ततन्त्रीवीणा

सप्ततन्त्रिभिः युक्ता वीणा सप्ततन्त्रीवीणा इत्युच्यते। अस्याः अपरनाम परिवादिनी इति भवति। सङ्गीतपारिजाते सङ्गीतसारयोः रुद्रवीणायाः षड्भेदाः तन्त्रीसंख्याम् आधारीकृत्या दृश्यते। तेषु भेदेषु परिवादिनी वीणायाः रुद्रवीणायाः च सप्ततन्त्र्यः भवन्ति।

## 22.औदुम्बरीवीणा

पण्डितविद्याविलासः वीणा भेदेषु औदुम्बरी वीणा अपि एका इति स्वीकरोति।'सौरन्ध्री शाङ्र्गो चैव औदुम्बरी मधुस्यन्दनी।' यतिमानपादखण्डेऽपि अस्याः स्वरूपवर्णनं न लब्धम्।

## 23.अनालम्बीवीणा

सुधाकलशः स्वग्रन्थे भिन्नानां देवतानां वीणानां नामानि लिखन्ति। तस्मिन् प्रसङ्गे लिखन्ति—'शिवस्य वीणा अनालम्बी।'अस्याः वीणायाः स्वरूपवादनसम्बन्धे कुत्रापि निर्देशः न भवन्ति।

## 24.आलापिनीवीणा

सङ्गीतरत्नाकरानुसारेण इयं वीणा अङ्गुल्या वादयति। आलापिनीवीणा त्रितन्त्रीया द्वितुम्बयुक्ता च भवन्ति।

### 25.अलाबुवीणा

वैदिकसाहित्ये अस्याः उल्लेखः भवति। एष वैदिककालीना वीणा आसीत्। लाट्यायनश्रौतसूत्रे पाणिनीयशिक्षायां च अलाबु वीणायाः निर्देशः भवति। एषा वीणा वाद्यप्रकाशे ध्वनिरहित दन्तमूलेन च उत्पन्नस्वराणां अनुकरणं करोति इति मन्यते। 'अलाबुवीणानिर्घोषो दन्तमूल्यस्वरानुगः।' अस्याः वीणायाः स्वरूपवादनवीधेः उल्लेखः कुत्रापि नोपलभ्यते।

### 26.काण्डवीणा

काण्डवीणा वैदिककालीन वीणा आसीत्। काठकसंहितायां अस्याः उल्लेखः भवति। परन्तु अस्याः स्वरसम्बन्धे विस्तृतसूचनाः नोपलब्धाः।

### 27.कात्यायिनीवीणा

वाद्यप्रकाशः इति नामके ग्रन्थे कात्यायिनीवीणायाः उल्लेखः भवति। अयं ग्रन्थः वाद्यानां घोषः भवति। तत् यथा—'ऋषिः कात्यायनो नाम तस्य कात्यायनी वीणा।'

### 28.कलावतीवीणा

सुधाकलशः स्वग्रन्थे सङ्गीतोपनिषद्सारोद्धारे गन्धर्वतम्बुरोः वीणा इयं इति वदन्ति। तत् यथा—

**विश्वावसोस्तु बृहती तुम्बरोस्तु कलावति।**
**नारदस्य महती वीणा सरस्वत् यास्तु कच्छपि।।**[11]

### 30.दण्डीवीणा

प्राचीनायाः एकतन्त्री वीणायाः परिवर्तनमेव दण्डी वीणा इति मन्यते।

### 31.विपञ्चीवीणा

विपञ्चिवीणायाः नवतन्त्र्यः भवन्ति। ताः क्रमशः षड्जः,ऋषभः,गान्धारः,मध्यमः, पञ्चमः, धैवतः, निषादः तथा अन्तरा गान्धारं स्थापना च भवन्ति।

## 32.निःशङ्कवीणा

सङ्गीतरत्नाकरे अस्याः उल्लेखः भवति। शाङ्र्गदेवेन स्वनाम्नि अस्याः वीणायाः कल्पना कृतम्। अस्याः वादनविधेःविस्तृतसूचना संङ्गीतरत्नाकरे अस्ति।

## 33.प्रभावतीवीणा

अस्याः वीणायाः सम्बद्धे सुधाकलशः लिखन्ति - 'गणानां च प्रभावती' अर्थात् गणानां वीणा प्रभावती इति नाम्नाऽभिधीयते।

## 34.मत्तकोकिलवीणा

सङ्गीतरत्नाकरे प्रथमं मत्तकोकिलवीणायाः उल्लेखः भवति। अस्याः एकविंशतितन्त्र्यः भवन्ति। इयं वीणा सर्वासु वीणासु प्रमुखा इति मन्यते।

## उपसंहारः

प्राचीनकालादेव तन्त्रवाद्यस्य सर्वाधिकं महत्वपूर्णं स्थानं भवति। सङ्गीतात्मकध्वनीनां तथा गतेश्च प्रकटनाय उपयुज्यमानं उपकरणं वाद्यमित्यभिधीयते। एवं सङ्गीतशास्त्रदृष्ट्या चतुस्त्रिंशः वीणाप्रकाराः दृष्टुं शक्यते। आधुनिककाले वीणानां प्रयोगं अधिकतया दृष्टुं शक्यते। एकतन्त्रीवीणा, आलापिनी, किन्नरी, पिनाकी, सितार, सारङ्गी, सरोद्, तच्छौरीवीणा इत्यादिषु आधुनिककाले उपयुज्यते। सङ्गीतलोके वीणानां प्रथम स्थानं भवति। सङ्गीतरत्नाकरे उक्तं भवति वीणावादन ज्ञानं भवति चेत् तस्य कृते मोक्षं लभ्यते इति ।

## <u>ग्रन्थसूची</u>


- नाट्यशास्त्रम् ,भरतमुनिः, काशीहिन्दुविश्वविद्यालयः, वारणसी,1971
- भारतीय सङ्गीत वाद्य, डा.मालमणि मिश्र,भीरतीय प्रकाशन्, दिल्ली, 1973
- याज्ञवल्क्यस्मृति, टि.गणपतिशास्त्रि,मुन्षिराम् मनोहरलाल प्रकाशकः, 1982
- सङ्गीतसुधा,प्रदीप् कुमार् टिसिट्ट्,1984
- सङ्गीतरत्नाकर, पण्डित सुभ्रमण्यशास्त्रि, अटयार् विद्यानिलयम् मट्रास्, 1943

- सङ्गीतोपनिषस्सारोद्धार,उमाकान्त परमानन्द शाह,
- सङ्गीतकल्पद्रुमम्,डा.एल्.मुत्तय्याभागवतर्,केरलभाषा इन्स्टीट्यूट्,तिरुवनन्तपुरम्,1977


## Referecnes


1. सङ्गीतरत्नाकर – 1.21
2. ईशाद्यष्टोत्तरशतोपनिषद् – पृष्टम् . 529
3. सङ्गीतरत्नाकर – 1.26 – 30
4. शब्दकल्पद्रुमः – चतुर्तकाण्डः
5. यज्ञवल्क्यस्मृति – 2.4.115
6. भारतीयसङ्गीतवाद्या - पृष्टम् . 32
7. भारतीयसङ्गीतवाद्या – पृष्टम् . 34
8. नाट्यशास्त्रम् – 29 . 118
9. भारतीयसङ्गीतवाद्या – पृष्टम्.41
10. सङ्गीतोपनिषत्सरोद्धार – 4.9
11. भारतीयसङ्गीतवाद्या पृष्टम्. –37